ISSN 2278 - 0688

# ऋतायनी

# RITAAYANI

( U.G.C. Approved Journal No.- 40907 )

VOLUME-XX

A REFEREED RESEARCH JOURNAL OF SANSKRIT

Vol. - XX
*ISSN 2278 - 0688*
Volume -XX
December 2021

# ऋतायनी

# RITAAYANI

**A REFEREED RESEARCH JOURNAL OF SANSKRIT**
**(U.G.C. Approved Journal No. 40947)**

***Chief Editor***
Dr. Chandrakanta Panda

***Editor***
Dr. Jagamohan Acharya

***Associate Editors***
Dr. Buddheswar Sarangi
Dr.Jogeswar Mahanta
Sushant Pradhan

Purulia , West Bengal

# CONTENTS


| Sl. No. | Subject | Author | Page |
|---|---|---|---|
| 1. | संस्कृतसाहित्यशास्त्रे भक्तिरसः | डः तपनशङ्करभट्टाचार्य्यः | 09 |
| 2. | साहित्यशास्त्रे न्यायशास्त्रीयसिद्धान्तस्य प्रक्रियायोगः काव्यप्रकाशग्रन्थस्य विशेषसन्दर्भे | डा. सुमन कुमार झा | 15 |
| 3. | संस्कृतकाव्येषु आलेख्यम् | डा.भारतभूषणरथः | 22 |
| 4. | काव्ये रसदोषाः | ड. चन्द्रकान्त पण्डा | 29 |
| 5. | मेघदूतकाव्ये समासोक्तिः | डॉ. हरिपदमहापात्रः | 33 |
| 6. | अभिज्ञानशकुन्तले अलङ्काराः सामासिकी समीक्षा | डा. सुनीता बर्मन | 39 |
| 7. | गुणालङ्कारयोः विमर्शः | डा. सुशान्त प्रधानः | 42 |
| 8. | चन्द्रालोके व्यङ्ग्यवैभवम् | डा.शिव प्रसाद वेहेरा | 45 |
| 9. | वेदस्मृतिगीताप्रभृतिषु सारालंकारयोग | डा.मेधाकुमारी | 50 |
| 10. | प्रतिभा | Menakarani Sahoo | 52 |
| 11. | सोत्कर्षेऽपि रघोवंशे रामोऽभूत्स्वकुलाधिकः | दिल्लीप कुमार देवता | 58 |
| 12. | साहित्यशास्त्रे रस-सिद्धन्तः | Rinku Guin | 64 |
| 13. | रूपक अलङ्कारस्य वर्गीकरणम् | Subhrajyoti Sitaram | 72 |
| 14. | संस्कृतसाहित्ये चम्पूकाव्यानुशीलनम् | Nibedita Samal | 77 |
| 15. | अलङ्कारशास्त्रे शब्दार्थसम्बन्धमीमांसा | श्रीमन्तच्याटाजी | 83 |
| 16. | धर्मशास्त्रं प्रति उत्कलस्य अवदानम् | ड. बलराम पण्डा | 90 |
| 17. | अष्टाध्यायाम् उल्लिखितानां स्त्रीप्रत्ययानां परिचयात्मकम् अध्ययनम् | शुभलक्ष्मी आचार्यः | 95 |
| 18. | गीतगोविन्दस्य महत्वविवेचनम् | शान्तनुमण्डलः | 99 |
| 19. | मेघदूतस्य नवरूपायनम् | डॉ. जगमोहन आचार्य | 108 |
| 20. | पुराणलक्षणम् | डॉ.लक्ष्मीकान्त पड्ढी | 115 |
| 21. | प्रकृतिकविः कालिदासः | डा. मिठु रानी महश | 120 |
| 22. | विभाषादिक्समासेबहुव्रीहौइति सूत्रस्य प्रख्यापनम् | प्रकाशकुमारत्रिपाठी | 126 |

# मेघदूतस्य नवरूपायनम्

डॉ. जगमोहन आचार्यः

उपक्रमः

कालिदासस्य साहित्यसरित् सदैव नित्यनूतनतायाः वारिधारां नीत्वा प्रवहमाना भवति। संस्कृतसाहित्ये तस्य प्रभावः नास्ति संदेहः किन्तु इतरप्रान्तीयभाषायां तस्य प्राधान्यम् इतोऽपि वर्तते। विश्वगुरु रवीन्द्रनाथस्य साहित्ये कालिदासस्य प्रभावः सुगभीरः। कालिदासस्य ध्वनिः संयोजना रवीन्द्रस्य मनसि तरङ्गिता । कालिदासस्य साहित्ये रवीन्द्रः अभिभूतः सम्मोहितः। वाल्यतः रवीन्द्रः कालिदासाहित्यानुरागी आसीत्।

रवीन्द्रनाथः न केवलं वङ्गभाषायां कविः अपितु कालिदासादनन्तरं आधुनिकभारतस्य कविः। कालिदासेन सह रवीन्द्रनाथस्य सजातीयत्व लक्षते। सेकाल कवितायां रवीन्द्रनाथेनोक्तम्,-

आमि यदि जन्म नितेन कालिदासेर काले
दैवे हतेम दशमरत्न नवरत्नेर माले,
एकटि श्लोके स्तुतिगेये वाजार काछे निताम चेये
उज्जयिनीर विजन प्रान्ते कानन घेरा वाडि।

रवीन्द्रनाथः कालिदासं मानसलोकस्य कविः वदति। मानसोऽयम् कैलासशृङ्गस्य मानसलोकः तथा मानवानां मानसलोकं एव। रवीन्द्रस्य भाषायाम्-

मानसकैलाशशृङ्गे निर्जनभुवने
छिलेतुमि महेशेर मन्दिर प्राङ्गणे
ताँहार आपन कवि, कवि कालिदास। (मानसलोक, चैतालि)

महाकवेः मेघदूतस्य प्रभावेण विशेषानुप्राणितः रवीन्द्रनाथः। तस्य मानसी काव्ये तथा नैताली काव्ये मेघदूतनाम्ना कविताद्वयं प्राप्यते। पुनः मेघदूतनाम्ना प्रबन्धः अपि तेन प्राचीनसाहित्य इति ग्रन्थे रचितः। कविताप्रबन्धयोः विषगतसमानता कालिदासस्य मेघदूतेन सह अस्ति। कालिदासस्य मेघदूतम् अनन्यसाधारणम्। मेघदूतकाव्यस्य चित्रावली तथा शब्दैश्वर्यं माधुर्यं च रवीन्द्रनाथस्य चित्तमाकर्षयति। वर्षासु जाह्नवी यथा सर्वतः जलधारा माहृत्य समुद्रे मिलति तथैव कालिदासस्य मेघदूतम् सकलविरहिजनानां कष्टं विरहिणी समीपं प्रापयति।

मेघदूतसंपर्के रवीन्द्रनाथस्यानन्यचिन्तनम्। वाल्यकालादेव रवीन्द्रः अग्रजस्य मुखात् मेघदूतस्य श्लोकं श्रुतवान्। ततः एव मेघदूतस्योपरि आकृष्टः। आषाढस्य प्रथमदिवसे...श्लोकं श्रुत्वा प्राचीनकालस्य घनवर्षणस्य चित्रं रवीन्द्रस्य मनसि उद्भासितम्। रवीन्द्रः कालिदासस्य श्लोकं सञ्जीवनीमन्त्रैव अनुभवन्ति। आषाढस्य वर्षा प्रतिवर्षमागच्छति किन्तु वर्षां नीत्वा जीवनभावनायाः